M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1126

Title: Puran Sravan Vidhi
ane Gayatri Bhujang

1126

Complete

C

Puran Shravan Vidhi + Gayatri Bhujang : Title

: Author

: Editor

: Year, Vols.

S/C : Publisher

1126 a : Remarks

अथपुराणश्रवणविधिः सूतउवाच संसारेस्सारभूतास्तेयेःश्रुतंनैव
भारतं तथाभागवतंचैवमहापातकनाशकं भवावानुकीर्त्यतेयत्रमहा
कैवल्यदायकं पुराणानिमहाबुद्धेहमुन्नसुरवादावै यःश्रृणोतिपुरा
णानिभक्तिमान्प्रयतःसदातस्यस्याद्धिमलाबुद्धिर्भवेद्धर्मपरायणा
यःशृणोतिपुराणानिसततंभक्तिसंयुतः हरिभक्तिर्भवेत्तस्यसमस्त
गुणदायिनी पुराणश्रवणेनॄणां बुद्धिर्धर्मेप्रवर्त्तते धर्मात्पापानिन
श्यंतिज्ञानंशुद्धंचजायते धर्मार्थकाममोक्षाख्यायेफलान्यपि हि
सर्वः श्रृणुयुस्तेमहात्मानःपुराणानिनसंशयः वक्ष्यामिश्रवणस्या
स्यविधिंपापघ्नणाशनं गणेशंपूजयेदादौ विधिवद्भक्तिसंयुतः
स्वस्तिवाचनिकंकृत्वा श्रवणादौविपश्चितः उपाविशेद्बुधः श्रोतारःप्रा
ङ्मुखाःसर्वे[illegible]श्चमाभिमुखावक्ता पश्चकोः प्राङ्मुखा
स्तथा सरस्वतीं सन्नमध्येनानाकारमंडितं नसश्चादा [illegible]

म्यक् व्यासस्याद्भुतकर्मणः सरस्वत्यासने दिव्ये निधाय संहितां शुभां पूजयेद्भक्तिभावेन नाना
दिव्याक्षभिः शुभैः ततो गुरुं व्यासरूपं पूजयेच्चंदनादिभिः नानालंकारवस्त्राद्यैर्धूपैर्दीपैः
सदक्षिणैः तथैव ब्राह्मणान् भक्त्या संपूज्य विधिवन्नरैः शृणुयात् संहितां नित्यं एकाग्रकृतनिश्च
यः आरंभे च समाप्तौ च कुर्याद्ब्राह्मणभोजनं गुरुणा सहितं राजन् यथाशक्ति यथाधन
दूसेवं संहितां श्रुत्वा समाप्तौ व्यासपूजनं श्रवणे कगुणं पुण्यं द्विगुणं पर्वदानतः उद्यापनात्त्रि
गुणं अनंतं भूमिदानतः तथा पूजाविधिं सम्यक् शृणु सर्वं महामते पुण्याहवाचनं कृत्वा
स्थापयेत्पीठमुत्तमं पुस्तकं पूजयेत्तत्र बहूपचारैः पृथग्विधैः उपवासी भवेत्पूर्वदिवसे भक्ति
मान्नरः नरनारायणौ देवौ पुस्तके च प्रपूजयेत् लक्ष्मीनारायणं देवं पूजयेत्कलशोपरि ततः
प्रातः समुत्थाय होमं कुर्याद्विचक्षणः श्रवणस्य दशांशेन तिलाज्यघृतपायसैः होमस्याथ दशां
शेन कुर्याद्ब्राह्मणभोजनं अथवापि यथाशक्ति वित्तशाठ्यं विवर्जयेत् होमांते विधिवद्दद्यादृत्वि
ग्भ्यो भूरिदक्षिणाः ततो वक्तारमानम्य संपूज्य च यथाविधि भूषणैर्हस्तकर्णानां वस्त्रैः क्षौ
मादिकैः शुभैः एवं संपूज्य विधिवत्पीठं नारायणात्मकं व्यासाय विधिवद्दद्यात् भूमिदानसमन्वितं
मंत्रः आचार्य हे महाविष्णो व्यासरूप नमोस्तु ते प्रसन्नो भव विप्रेंद्र प्रसन्नो मे जनार्दनः मयातेवदना
द्विप्र पवित्रं कृतमुत्तमं तेन मे सफलाः कामाः सकलाः संतु सत्वरं दानान्यन्यानि कुर्वीत गोयुग्मं भूरिद
क्षिणाः एवमुद्यापनं कृत्वा तस्य पुण्यमनंतकं इति श्रीमहाभारते पुराणश्रवणाविधिः ॥ ॥ ॥